वृद्धिप्रसङ्गोऽस्ति। वृद्धेरभावात् प्रतिषेधोऽपि नास्ति इत्यप्रसङ्गः। उत्तरपदवृद्धेरप्ययं प्रतिषेध इष्यते। पूर्वत्र्यलिन्दे भवः पूर्वत्रैयलिन्दः। यत्र तूत्तरपदसम्बन्धी यण् न भवति तत्र नेष्यते प्रतिषेधः। द्वे अशीती भृतो भूतो भावी वा द्व्याशीतिकः॥

## द्वारादीनां च। (४/१३८६)

द्वार इत्येवमादीनां य्वाभ्याम् [1]उत्तरपदस्य अचामादेरचः स्थाने वृद्धिर्न भवति, पूर्वौ तु ताभ्याम् ऐजागमौ भवतः[2]। द्वारे नियुक्तः दौवारिकः। द्वारपालस्य [3]इदं दौवारपालम्। तदादिविधिश्चात्र [4]भवति। स्वरमधिकृत्य कृतो ग्रन्थः[5] सौवरः[6]। [7]सौवरः अध्यायः, सौवर्यः सप्तम्यः इति। व्यल्कशे भवः वैयल्कशः। स्वस्ति इत्याह सौवस्तिकः। स्वर्भवः सौवः।

[८४२] अव्ययानां भमात्रे टिलोपः[8]।

स्वर्गमनमाह [9]सौवर्गमनिकः। स्वाध्याय इति केचित् पठन्ति, तदनर्थकम्। शोभनोऽध्यायः इत्येतस्यां व्युत्पत्तौ [10]तु पूर्वेणैव[11] सिद्धम्। [12]अथापि एवं व्युत्पत्तिः क्रियते, [13]स्वोऽध्यायः स्वाध्यायः इति? एवमप्यत्रैव स्वशब्दस्यैव पाठात् सिद्धम्। तदादावपि हि [14]वृद्धिरियं भवत्येव। स्फ्यकृतस्य अपत्यम् स्फैयकृतः। स्वादुमृदुनः इदम् सौवादुमृदवम्। शुनः इदम् [15]शौवनम्। अणि 'अन्' (६.४.१६७/११५५) इति [16]प्रकृतिभावः। शुनो विकारः शौवं मांसम्। '[17]प्राणिरजतादिभ्योऽञ्' (४.३.१५४/१५३२) इत्यञ्। श्वादंष्ट्रायां भवः शौवादंष्ट्रो मणिः। स्वस्य इदम् सौवम्। स्वग्रामे भवः सौवग्रामिकः[18]। अध्यात्मादित्वात् ठञ् (वा. ४५६)। अपवादान्तार्थोऽयमारम्भः।

द्वार। स्वर। व्यल्कश। स्वस्ति। स्वर्। स्फ्यकृत। स्वादुमृदु। श्वन्। स्व। द्वारादिः॥

## न्यग्रोधस्य च केवलस्य। (७/१५४३)

न्यग्रोधशब्दस्य केवलस्य यकारादुत्तरस्य अचामादेः अचः स्थाने वृद्धिर्न भवति, [19]तस्माच्च पूर्व[20]मैकार आगमो भवति। न्यग्रोधस्य विकारः नैयग्रोधः [21]चमसः। केवलस्य इति किम्? [22]न्यग्रोधमूले भवाः शालयः न्याग्रोधमूलाः शालयः। न्यग्रोहयति इति न्यग्रोधः इति व्युत्पत्तिपक्षे नियमार्थम्,[23] अव्युत्पत्तिपक्षे विध्यर्थम्॥

---

1. उत्तरस्य इ. 2. तद्धिते ञिति णिति किति च इत्यधिकम् क. इ. 3. अयं दौवारपालिः इ, इयं दौवारपाली ह. 4. इष्यते क. 5. इति इत्यधिकम् क. 6. ग्रन्थः इत्यधिकम् क. 7. सौवरोऽध्यायः नास्ति ड. 8. वक्तव्यः इत्यधिकम् क. 9. सौवर्गामिकः क, सौवर्गगामिकः ड. 10. तु नास्ति क. ह. 11. सिद्धः क. 12. तथापि क. 13. स्वस्य अध्यायः इ. 14. विधिरयं इ. ड. 15. शौनम् क. 16. प्रकृतिवद्भावः क. इ. ह. 17. प्राणि-आरम्भः नास्ति इ. 18. स्वनगरे भवः सौवनगरिकः इत्यधिकम् क.ह. 19. तद्धिते ञिति णिति किति च परतः इत्यधिकम् क. 20. ऐजागमः क. 21. फलम् इ. 22. वाक्यमिदं नास्ति क. 23. वचनम इत्यधिकम् क.